# 'THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS'.

## PREFATORY NOTE.

The Library attached to the Government Sanskrit College, Benares has long been known as the repository of rare manuscripts. Several attempts have been made in the past to make these available to the public. During the Principalship of the late R. T. H. Griffith, Messrs. E. J. Lazarus & Co. started the valuable Journal, the 'Pandit', which, during the last forty years and more, has been publishing Sanskrit texts and translations, with the help of the Professors and Scholars of the Sanskrit College. Subsequently in the early nineties, the same enterprising firm brought out a number of valuable texts, called the 'Vizianagram Sanskrit Series' under the supervision of the late Principal Dr. Arthur Venis, C. I. E. Even before this the firm of Messrs. Braj Bhusan Das & Co. started the 'Benares Sanskrit Series' under the guidance of the late Dr. G. Thibaut, who was Principal of this College for several years between 1880 and 1890.

All these attempts however have been more or less indirect. Though nearly all the material and editorial talent was supplied by the Government College, the ventures belonged to these parties. And the effect has been that in course of time the control of the College began to relax, till its connection with them has now become extremely shadowy, with what results it is for the public to judge.

Thus it is for the first time now that the College is going to launch into existence this new venture entirely on its own account. The Series is going to be published on behalf of Government by the U. P. Government Press, and the work of editing shall

devolve upon the Principal, the Professors, the Librarians and the Scholars of the Sanskrit College.

The first four numbers of the Series are now ready. The selection of these works as fit for publication was made by the late Dr. Venis, and they represent to a certain extent the work that he did as the "University Professor of Post Vedic Culture."

It is expected that the next few numbers will contain, among other works, instalments of—(1) the *Bṛhatí,* Prabhákara's commentary on the Shábara Bháshya, along with the commentary by Shálikanátha, styled the 'Ṛjuvimalá' and (2)—the *Náṭya Shástra* of Bharata, with its commentary by Abhinavagupta, styled the 'Náṭyavedavivṛti.'

Considerable progress has already been made with work on these two important texts, and it is expected that they shall go to the Press before July next.

It may be mentioned here that ever since the establishment of the Library on a proper footing a considerable amount of work has been going on here, being done by Pandit Gopinath Kaviraj, the gifted Librarian, and the band of scholars of the 'Sadholal Trust,' and the Principal himself.

With a view to place all this before the public it is proposed to start a Journal under the name of 'The Princess of Wales Sarasvati Bhavana Studies', which will embody the researches carried on at the Library by the Principal and his colleagues.

At what intervals this Journal will appear it is not possible to determine now. It will all depend upon the output of work, but more specially upon the amount of support that the public shall extend towards it. It is hoped that the first number of the Journal shall be published during the month of July next.

SANSKRIT COLLEGE,
*Benares.*

GANGANATHA JHA,
*Principal.*

# INTRODUCTION.

## A
## THE PRESENT WORK.

Kiraṇâvalî.

Of the four commentaries* which Râjaśekhara mentions† as existing in his time on Praśastapâda's Vaiśeshika Bhâshya, Udayana's Kiraṇâvalî (though left incomplete) was doubtless the most learned and consequently the most widely read in ancient times. The large number of commentaries written on this work, as indeed on all of Udayana's treatises, testifies to the great popularity which it once enjoyed.

Its commentaries—Prakâśa and Bhâskara.

But Kiraṇâvalî being a difficult work, not so much for its language which is always lucid, straightforward and free from ambiguities of expression, but for metaphysical subtleties, it stands in need of a good commentary to bring out its inner significance. The only commentary hitherto available in print has been Vardhamâna's Kiraṇâvalîprakâśa. Kiraṇâvalîbhâskara by Padma-

* The 4 commentaries are: (1) Vyomavati by Vyomaśivâchârya, (2) Kiraṇâvalî by Udayanâchârya, (3) Nyâya-Kandalî by Śridharâchârya and (4) Nyâyalilâvatí by Śrîvatsâchârya. The identity of the fourth work is doubtful, but most probably it is meant for Vallabha's famous work of that name, though it is not a regular commentary on Praśastapâda.

† In his commentary on the Nyâyakandalî, called Pañjikâ, See Peterson's Third Report, p. 273.

nâbha, which is now offered to the public, is a fresh addition to the list.

Padmanâbha claims his work to be a supplement to Vardhamâna's Prakâśa*; and from a careful study of the book it seems that his claim is not merely an idle vaunt. The Bhâskara has really an independent value and will profitably be used in reference to questions on which Vardhamâna is as a rule either silent or very meagre.

His rivalry with Vardhamâna.

It is interesting to note that Padmanâbha considered himself to be a rival of Vardhamâna, and the verse towards the close of the work (p. 184) in which he speaks of the versatility of his father's genius is reminiscent, and probably an imitation, of similar statement by Vardhamâna in regard to Gaṅgeśa†.

## B

## THE AUTHOR.

Personal & family history of Padmanâbha.

Regarding the personal and family history of Padmanâbha Miśra we have to rely almost exclusively on the scattered information we can gather from his own works. Since these works have not yet been published, it may be of some interest to bring together all that

---

* उपदिष्टा गुरुचरणैरस्पृष्टा वर्द्धमानेन ।
किरणावल्यामर्थास्तिन्यस्ते पद्मनाभेन ॥ १ ॥
विशदवर्द्धमानापि तिरोहितदिवाकरा ।
चकास्त्यर्थप्रकाशाय न क्षमा किरणावली ॥ २ ॥

† cf. यस्तर्कतन्त्रशतपत्रसहस्ररश्मि-
र्गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्यात्मजोऽतिगहनां किरणावलीं तां
प्राकाशयत्कृतिमुदे बुधवर्द्धमानः ॥

we know about this auther from a study of the Mss. and to see if we can read them into a consistent account.

His nationality.

Padmanâbha belonged to Eastern India, it is sure; but whether he was a Maithila or a Bengali is not positively known. He is indifferently called 'Miśra' and 'Bhaṭṭâchârya' in his works, but as none of these terms is a characteristic title proper to either Mithilâ or Bengal, this would afford us no clue to his true nationality. But it may be presumed, according to tradition, that he was a native of Mithilâ.

His life at the court of Rewâ.

It must have been a strange stroke of fortune, of which the history is quite unknown, which led to the migration of this peaceful scholar of the Eastern plains to the mountainous regions of Bundelkhand, to be settled there as a courtier of the royal Darbar of the Baghela princes. His patron was the prince Vîrabhadra, son of Mahârâjâdhirâja Râmachandra Deva, of the Baghela family of Rewâ. It seems that Vîrabhadra had a very high regard for Padmanâbha and his intellectual accomplishments, and helped him very substantially in the clearance of his debts. In the 'Setu', a commentary on Praśastapâda's Vaiśeshikabbâshya Padmanâbha gratefully remembers the generous qualities of his master*, saying that it was to return this act of Vîrabhadra's kindness towards himself that he undertook the composition of the above

* Cf. the expressions (i) ऋणनिकायार्णवस्य परा गतिः and (ii) ऋणवदान्याद् विनिर्मुक्तेन, occurring in the Setu with reference to Vîrabhadra,

commentary and named it after him Viravaliya.*

Padmanâbha was the second son of Balabhadra Miśra and Vijayaśrî, and was the younger brother of Viśvanâtha, of whose life and works absolutely nothing is known. He had also a younger brother named Govardhana whom he taught various S'âstras† and who became well known in course of time as the author of two commentaries,—one, Tarkabhâshâprakâśa, on Keśava Miśra's famous Nyâya tract of that name, and the other, Nyâyabodhinî, on Annam Bhaṭṭa's Tarka Sangraha. His father Balabhadra, from whom he had the privilege of taking lessons on the Vaiśeshika and Vedânta systems of philosophy, had been a very great scholar‡, and though

His relations.

---

* अमुनानुयोकृता वयमन्यवदान्याद् विशिष्टेन ।
मन्युपकारधियाऽयं रचितो ग्रन्थस्ततोऽस्माभिः ॥

The name Víravara is not a personal name, but only an honorific title. Pandit Surendralal Goswami is wrong in taking (in his Preface to the Tarkabháshá) the name as proper and identifying it with Vírasimha, king of Bundi (1341-1419). It may be noted here that the epithet *Víra* occurs in association with Vírabhadra's name in his Kandarpachûḍâmaṇi, *viz.* भूपक्रमक्रमवर्ती वीरः श्रीवीरभद्रोऽभूत् ।

† Govardhana himself refers to his pupilage under his brother: तर्कोऽपि तर्कनिधिनाऽस्य सर्वम् श्रीपद्मनाभाद् विदुषो विनीतम्—verse 3 of the benediction of Tarkabhâshâprakâs'a.

‡ Both Padmanâbha and Govardhana call their father by the name of *Jagadguru*. Padmanâbha acknowledges in the Setu and in the Bhâskara that the source of all that he wrote was in the lessons he received from his father. Cf. Setu: अमृतपदमुपनीय श्रीमतस्तातचरणात्, &c. So in Bhâskara, p. 1.

his works were not received with the same enthusiasm as they really deserved it is beyond question that his learning was vast. His Yuktikalpadruma, a commentary on Vardhamâna's Kiraṇâvalîprakâśa, was indeed his masterpiece, but his commentaries on Saptapadârthî, Târkikarakshâ and Tarkabhâshâ (the most severely denounced of all!) must also have been highly valuable. Gaurîkânta's strictures on Balabhadra and Govardhana (who took up his pen simply to re-establish his father's waning fame) need not be taken in more than a passing fashion.

His title.

In recognition of his manysided scholarship Padmanâbha obtained, apparently from the royal court with which he was associated, the distinguished title of Sakalaśâstrârabindapradyotana (or °pradyota°) bhaṭṭâchârya (or° bhaṭṭa). This is found in the colophons of many of his works, e. g Kiraṇâvalîbhâskara, Kaṇâdarahasyam, Vardhamânendu, Śaradâgama, &c.*

His works.

Padmanâbha was the author of a large number of works, mostly commentaries on Nyâya and Vaiśeshika systems of which he was a master. He was a good poet and a good rhetorician. His works may be described as under the following classes:

(a) In Nyâya—

(1) *Chintâmaṇiparîkshâ*:

This is a commentary on Gaṅgeśa's Tattva Chintâmaṇi.

---

* The word *Pradyotana* is clearly indicative of a title, when read in connection with the preceding phrase *Sakalaś'âstrârabinda*°. Aufrecht (Vol. I. p. 594) is therefore wrong in assuming it to be the proper name of an individual. The error is probably due to the fact that in Śaradâgama the author's real name does not appear, but only the epithet.

(*b*) In Vaiśeshika—

(i) *Kaṇâdarahasyam*, a commentary on his own *Râddhântamuktâhâra*, a collection of 81 kârikâs*. It appears from what he says in the concluding verse of this tract that he wrote it simply to please himself with the consciousness of having complied with the request of Pragalbhâchârya whom he describes as the teacher of his own teacher†. His own teacher, as referred to in this passage, is undoubtedly his father Balabhadra Miśra of whom he himself speaks as his guru in the beginning of the Setu and elsewhere. Pragalbha, therefore, must have been the teacher of Balabhadra. That this is so will also be apparent from a passage in the Setu where Padmanâbha, while discussing the question whether Darkness is a substance or a quality or merely an absence of Light, introduces the personal view of Pragalbha Bhaṭṭâchârya whom he mentions there as his father's guru (अस्मत्पितृचरणारा-ध्याः श्रीप्रगल्भभट्टाचार्यास्तु "आलोकाभावस्य समस्तेऽनुद्भूतरूप-वत्त्वात् प्रभाया अपि प्रतियोगित्वे प्रवेशे, &c." ‡

(ii) *Vardhamânendu* :

This is a commentary on Vardhamâna's Dravya-Kiraṇâvalî prakâśa. Padmanâbha composed this work as an abstract or digest of Yuktikalpadruma§ (other-

---

* See Burnell, Tanjore Catalogue, p. 122b; Peterson, Third Report, p. 261.

† यद्यदत्र विनिक्षिप्तं मया किञ्चिन्मनस्विना ।
पद्मनाभेन तैः प्रीतः प्रगल्भोऽस्तु गुरोर्गुरुः ॥

‡ My own manuscript of Setu, fol. 47a. Pragalbha's view on तमः is also quoted in the Kiraṇâvalibhâskara, p. 40.

§ The first verse of benediction runs thus :

बलभद्रकृतारम्भाद्धेदद्युम्णाधिप्रयत्नतः ।
वर्द्धमानेन्दुरधुना पद्मनाभेन तन्यते ॥

wise known as Yuktikâmadhenu or simply Yukti) which had been not only the *magnum opus* of his father but indeed the best commentary yet written on Vardhamâna's Prakâśa.

(ii) *Kiranâvalîbhâskara*:

This is an independent commentary on Udayana's work and is highly valuable and interesting, specially as a supplement to Vardhamâna's Prakâśa.

(iv) *Vaiseshika Setu*:

This is a direct commentary on Praśastapâda's Bhâshya. The work does not seem to have ever been completed nor even meant to be complete. It extends as far as the Dravya section of the commentary*. But from what we have before us it may fairly be said that it justifies fully well the claim set up for it as being one of the best productions of its author.

(v) *Nyâya kandalîṭîkâ*:

Padmanâbha is also reputed to have commented upon Srîdhara's Nyâya Kandalî†, but as no Ms. of this work has yet been discovered it is hard to say whether the tradition has any historic basis.

(c) In Vedânta—

(i) *Khaṇḍana Khaṇḍa Khâdya ṭîkâ.*

(d) In Poetry—

(i) *Vîrabhadradevachampû*:

This is an eulogy on the heroic exploits of his

---

* It is curious that many of the treatises which deal with Pras'astapâda Bhâshya directly or indirectly do not go beyond Dravyapadârtha. Jagadîs'a's Sûkti, Raghudeva's Dravya Sâra Sangraha, Jayarâma's Padârthamâlâ may be mentioned by way of illustration.

† See Mm. V. P. Dvivedin's Introduction to Vais'eshika Dars'ana—Kiraṇâvalî, p. 4.

patron, Vîrabhadradeva, and was composed in 1578 A. D.*. This date is practically synchronous with the year (Samvat 1633) in which Vîrabhadra is said to have finished his own Kandarpachûḍâmaṇi, a metrical gloss on Vâtsyâyana's Kámasûtras†.

(e) In Rhetoric—

(i) *S'araddgama or Chandrâlokaprakâs'a*:

This is a commentary on Jayadeva's Chandrâloka. It was written at the request of Vîrabhadra himself‡. The date of its composition is not known. But the fact that in the colophon Vīrabhadra is described as a

---

* For the date see Peterson's First Report, p. 101. For Vírabhadra's exploits &c. see Nasir-ul-Umara (Persian Text), pp. 228-9. It is very likely that Vírabhadra, whom his father (Râjâ Râma Chandra Deva) had sent to the Imperial Moghul Court about 1569 A. D., probably as an *attache'* of the new born prince Selim (Jehangir), lived in the Capital, at least from time to time, almost throughout his life, *i. e.* till the year 1592 when he succeeded to his father's throne on the latter's death. He himself died by accident in 1593. In the Government Sanskrit Library, Benares, there is a manuscript of Kathâ Sarit Sâgara which contains a queer Persian Seal on the front leaf. In the legend of the seal which is dated in A. H. 977 (=1569 A. D.), Vírabhadra is described as the *banda* (slave) of Sultan Selim For a short note on this Seal see my paper in Journal of the U. P. Historical Society, vol. I., pp 182-186.

† हरलोचन (3) हरलोचन (3) रस (6) शशि (1) मितिविश्रुते समये ।
फाल्गुणशुक्लप्रतिपदि पूर्णो ग्रन्थः स्मरस्येरः ॥ See Schmidt's "Beiträge zur indischen Erotik," p. 400. Cf. Peterson's Second Report, p. 133.

‡ क्रियते तस्य ( वीरभद्रस्य ) निदेशाच्चन्द्रालोके प्रकाशोऽयम् ।
शरदागम इति विदितो भट्टाचार्येण यत्नेन ॥ Verse 7 at the end of the work.

prince ( °युवराजवीरभद्रदेवादिष्ट &c.) shows that it must have been sometime before 1592, the year of Vírabhadra's accession to the throne.

**His date.**

We know that Vírabhadra was a prince from before 1569 to 1592 A. D., that his Kandarpachûḍâmaṇi was written in samvat 1633 and that Padmanâbha's own Champû was dated 1578 A. D. Padmanâbha's literary activities may therefore be assigned to the 3rd and 4th quarters of the 16th century.

## C

## THE PRESENT EDITION.

**Ms. material.**

The present edition of the work is based upon a collation of two manuscripts, marked here as A and B,—both belonging to the Government Sanskrit Library, Benares.

(1) Manuscript A :

Leaves 1-136a. Lines 9 in a page, and letters 46 in a line. Size 11·8″ × 4·6″ inches. Complete. Generally correct. Dated Samvat 1691 (=1634 A. D.). Transcribed in Devanâgari character by one Parasurâma Dandin at Pâṭaliputra (Patna) for the use of one Harirâma Dvivedin. The colophon runs thus: संवत् १६८१ समये कार्त्तिक सुदि दशम्यां तिथौ भौमदिने । पटलिपुत्रे नगरी गंगाया समिपे लेखक परशराम दंडि । हरिराम द्विवेदस्य भास्करपुस्तकं पठनार्थं ॥ * * शुभमस्तु ॥ ($136a^{6\text{-}7}$)

(2) Manuscript B :

Leaves 1-2, 7-19, 21-32, 34. Lines 8 in a page and letters 27 in a line. Size 10·1″ × 4·3″ inches. Incomplete. Incorrect. Very carelessly written. Devanâgarī script. No date, but apparently a hundred years old.

No pains have been spared to ensure correctness of the text, so far as it was possible to do on the basis of a single manuscript (Ms. B being practically useless),—and that too evidently unused and uncorrected. Through inadvertencies of the press and owing to the hurry of publication, however, some slips have still remained. A list of such errata is subjoined at the end, and it is hoped that the reader will consult it before he goes through the book.

In conclusion the editor feels it his pleasant duty to acknowledge with thanks his indebtedness to P. Badrinath S'astri, M. A., now of the Christ Church College, Cawnpore and formerly a scholar of the Government Sanskrit Library, Benares, for preparation of the press manuscript, and to P. Nârâyaṇa S'âstri Khiste Sâhityâchârya for helping him at times with reading of the proofs.

Government
Sanskrit Library,
Sarasvati Bhavan,
*Benares.*

GOPINATH KAVIRAJ.

# किरणावलीभास्करः ।

:o:

उपदिष्टा गुरुचरणैरस्पृष्टा वर्द्धमानेन ।
किरणावल्यामर्थास्तन्यन्ते पद्मनाभेन ॥ १ ॥
विलसद्वर्द्धमानापि तिरोहितदिवाकरा ।
सकलार्थप्रकाशाय न क्षमा किरणावली ॥ २ ॥
बलभद्रमुखाम्भोजवचनादुदयाचलात् ।
उदितो भास्करस्तस्मादा(१)दरेण निषेव्यताम् ॥ ३

विघ्नध्वंसकामनया कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—विधेति । विद्येव या सन्ध्या तस्या उदयोद्रेकात् Ben.1.1 Cal.1:1 अविद्येव या रजनी तस्याः क्षये सति यदुदेति तस्मै नमः। कस्मैचित् विशिष्याशक्यनिर्वचनस्वरूपाय । विश्वतः विश्वस्मिन् त्विट् कान्ति(२)र्यस्येत्यर्थः । अत्र यद्यप्युदेतीत्यनेनोदयकर्तृत्वेनैव नमस्यः प्राप्तस्तच्च चन्द्रादिसाधारणं न विश्वत इत्यादिना तद्व्यावृत्तिः। नक्षत्रव्यावृत्तेः सम्भवेऽपि चन्द्रव्यावृत्तेरसंभवात् । तत्रापि(३) रजनीक्षये सतीत्यनेन सूर्यः प्राप्यते रजन्याः क्षयोत्तरमन्यस्योदयासंभवात् । कस्मैचिदित्यस्य यद्यपि विशिष्येत्यादिरर्थे। न शक्यस्तथापि(४)

(१) B reads यस्मात् ।  (२) B reads दीप्ति ।
(३) B reads तथापि ।  (४) B omits तथापि ।

तथा निर्देशादेव तथा प्राप्यते, अन्यथा विशिष्य निर्देशः क्रियेत। विश्वत इत्यादावलुक्समासः। न च विश्वस्मिन्निति स्यात् तसिलः सर्वविभक्तावनुशासनात्। विभक्तिलोपशङ्काऽ-लुक्समाससमाधानं च संभवाभिप्रायेण विश्वस्मिन्निति-विग्रहदशायामिति ध्येयम्। न तु वस्तुगति, विश्वस्मिन्त्विव इत्यलुक्समासबोधकाभावात्। नापि तसिलो लोप शङ्का, तस्याविभक्तिकत्वात्। ननु रविरश्म्यसमानकालीनो रविरश्मिध्वंसो रजनी, तस्याः कथं क्षयः ध्वंसस्य ध्वंसा-संभवात्? उदयोद्रेकश्चोत्पत्त्याधिक्यं, न च तत् संभवति, तस्याः सर्वत्र समत्वेनोत्कर्षापकर्षासंभवात् आद्यक्षणसंबन्ध-रूपायास्तस्याः सर्वत्र समत्वात्। न चोत्पत्तिरेवोदयोद्रेक-पदेन गृह्यते सन्ध्याया एव रजनीविरोधितया तावत्पर्यन्त-वैयर्थ्यादिति चेन्न, रविरश्मिः सन्ध्या तदुदयोद्रेकात् उत्प-द्यमानाद्रविरश्मेरिति यावत्। रजनी च प्रकृते रविरश्मि-संबन्धप्रागभावस्तस्य क्षयश्च संबन्ध एव प्रतियोगिन एव प्रागभावक्षयत्वात्। एवं च रविरश्मेः(१) रविरश्मिसंबन्धे सति यदुदेति उदयगिरिशिखरोपलक्षितमूर्ध्वदेशमालम्बत इति प-र्यवसन्नम्। न चेदमनुपपन्नम्। प्रथमतो रश्मेरुत्पत्तिस्ततस्ते-नोदयाचलसंयोगस्तदनूर्ध्वं गतिरिति क्रमसंभवात्। उत्पद्य-मानादिति चोत्पत्त्यनन्तरमेव संबन्धप्राप्त्यर्थं, स च कार-णाकारसंयोगाद् द्वितीयक्षणे संभवत्येव। व्यवधानेऽपि वा कियती नः क्षतिः भूयोऽयवधानवारणात्। विद्यासन्ध्य-योरर्थप्रकाशकत्वं साधर्म्यं न च विद्याऽर्थप्रकाश एव अनुभवरूपस्य प्रकाशस्य स्मृतिजनकत्वात्। मिथ्याज्ञानरज-

---

(१) A omits च रविरश्मेः।

न्योश्च तत्त्वज्ञानविरोधित्वं सम्यक् । यत्तु क्षयपदेन विशिष्टाभाव एव गृह्यते, विशिष्टाभावश्च विशेषणाभावाद् भवत्येव, दण्डाभावे सति दण्डविशिष्टपुरुषाभाववत् रविरश्म्यसंबद्धुरविरश्मिक्षयाभावस्य रविरश्मिसंबन्धविशेषणाभावे सत्युपपत्तेरिति, तन्न । प्रकृतविशिष्टाभावस्य प्रकृतविशेषणाभावसमकालत्वेन पौर्वापर्यासंभवादिति दिक् । तथावादिना हि संध्योदयोद्रेकपदेन विशेषणाभावरूपो रविरश्मिसंबन्धो गृह्यते, एवं च रविरश्मिसंबन्धाद्विशिष्टाभावरूपरजनीक्षये सतीत्यर्थः क्रियते । न च तत् संभवति विशिष्टम् । प्रकृते रविरश्म्यसंबन्धविशेषणरविरश्मिध्वंसविशेष्ययोः संबन्धः । स च प्रकृते स्वरूपसंबन्धत्वेन स्वरूपद्वयात्मा । एवं च रविरश्म्यसंबन्धरूपं विशेषणमपि संबन्ध एव । तथाच तदभावसंबन्धाभावयोरैक्यमेवेति पौर्वापर्यासंभवात् । दण्ड्यभावे तु संभवति, तत्र संयोगस्य संबन्धतया तदभावस्य दण्डाभावानन्तरमुत्पत्तेः गुण्यभावे गुणाभावस्य सर्वसिद्धत्वात् । विद्यैव यासंध्या तदुदयोद्रेकादविद्यैव या रजनी तस्याः क्षये सति यदात्मस्वरूपमुदेति मोक्षभावत्वति तस्मै विश्वतत्त्वविषयकज्ञानाय जीवन्मुक्ताय नम इति वा । उदेति जीवन्मुक्तेभ्यो मोक्षं ददाति तस्मै लक्ष्मीसहायाय नम इति वार्थः । अत्र च विद्योदयोऽविद्याक्षयश्च जीवन्मुक्तानामेव । तस्य नित्यविद्यत्वेन नित्यमविद्याशून्यत्वेन च तदुभयासंभवात् ॥ १ ॥

बहुविघ्नशङ्कया मङ्गलान्तरं करोति—यत इति । अत्रापीश्वरत्वेन सूर्य एव नमस्य इति केचित् । तन्म्या रात्रेरीश्व- 4.1 2 1

रघुचन्द्र इत्यन्ये। परमेश्वर इति परे। उपासनं मननं नमस्कारो वा। मननस्यापि तत्स्वरूपावगाहित्वेन मङ्गलत्वात्। यतो द्रव्यं नित्यं ज्ञायते अनित्यमुत्पद्यते ज्ञायते च। एवं गुणेष्वपि। कर्म तु न नित्यम्। सामान्यादि तु नानित्यम्। वा शब्दः समुच्चये। अत्र द्रव्यमित्येकवचनमात्मनः प्राधान्ये तात्पर्येण। श्रवणादिभेदेन तत्त्वज्ञानबाहुल्यावगमाय गुणा इति बहुवचनम्। यद्वा, द्रव्यं हिरण्यादि, गुणाः शास्त्रादयः, कर्म यागादि, पराऽपरा जातिरुत्कृष्टापकृष्टजातीयं शरीरं, विशेषा इतराधिकप्रकर्षरूपाः, समवायः सदसत्संगतिरिति ॥ २ ॥

यद्यपि द्रव्यादयोऽभिधेयाः पूर्वपद्येनोक्तास्तथाप्यभि-
2.3 धेयतया नोक्ता इति तथाभिधानायाह—अर्थानामिति।
5·1 उदयन आचार्य इमां किरणावलीं व्यातेने। सत्तर्का एव
तेजांसि अर्थप्रकाशकत्वात्तन्मयीम्। प्रयोजनमाह—अर्थाना-
मिति। द्रव्यादितत्त्वज्ञानायेत्यर्थः। एतावता प्रतिपाद्यतया
त एवाभिधेया इति प्राप्तम्। तत्त्वार्थानां प्रविवेचनं मननरूपं,
तच्चानुमितिरूपतया न शब्दात्मकग्रन्थसाध्यमत आह—
सन्मार्गस्येति। सन्मार्ग इतरभेदे हेतुर्लक्षणात्मकस्तस्य वि-
लोकनायेत्यर्थः। एतावता हेतुज्ञानद्वाराऽनुमितिप्रयोजकत्वं
तस्येति सिद्धम्। ननु तत्त्वज्ञानं न स्वतः पुरुषार्थः सुखदुःखा-
भावेतरत्वात्, अत आह—नतय इति। मोक्षार्थिनो लोकस्य
मोक्षायेत्यर्थः। एतावता गौणप्रयोजनत्वमुक्तं भवति, तत्र
व्यापारमाह—अन्तरिति। एवञ्च शास्त्रेण हेतुज्ञानं, तेन
निदिध्यासनद्वारा साक्षात्कारद्वारा तमःशान्तिस्ततो मोक्ष
इति सिद्धम्। पूर्वग्रन्थैरन्यथासिद्धिं वारयति—तत्तदिति।

येस्तमोगुणप्रधानैश्चार्वाकादिभिः पूर्वग्रन्था दूषितास्तेषामनेन
तन्मतदूषकेण प्रीतिरिति भावः। तथाचायं तन्मतदूषकतया
तत्त्वज्ञानपर्याप्त इति भावः। नन्वनेन किं तत्त्वज्ञानं जन्यते
इत्यत आह—विद्येति। विद्यावतां श्रवणवतां प्रीतिर्मनन-
जनकादेव भवति तस्य तदुत्तरकालीनत्वादिति भावः। अथ
च उत् ऊर्ध्वं गमनं यस्येति व्युत्पत्त्योद्यनः सूर्यः किरण-
परम्परां व्यातेने। अत्र सत्तर्का इव तेजांसि विद्यावतां वैदि-
कानां तेषां वैदिककर्माचरणार्थं सूर्योदयसापेक्षत्वात्। ताम-
सानां, नक्तञ्चराणां प्रीतिः सूर्योदयात्प्रसिद्धैव, गृहान्तर्वर्ति-
दुष्वान्तक्षतिघटादिसाक्षात्कारमार्गविलोकनगतयश्च ततो
भवन्तीति सुप्रसिद्धम् ॥ ३ ॥

अतिविरसमिति। ये एतत्तन्त्रमतन्त्रं असत्तन्त्रं वदन्ति 3.1 7.1
ते एते अनुकम्प्यन्ते सम्यगवबोध्यन्ते। पूर्वग्रन्थेषु दुष्टप्रमेय-
ज्ञानेनासत्यं वदन्ति, अमुना तु ग्रन्थेन सम्यक्प्रमेयज्ञानात्
सत्यं वदिष्यन्तीत्याशयः। ते तु प्रकर्षेण खला दोषैकदृश्वानो
जडधियो विशेषादर्शिनः। असत्यवादिनः उदधिशास्त्रयोर्द्व-
योरप्यसत्यं वदन्ति, अतिक्रान्ता वयः पक्षिणो यस्मात्ताद्-
ग्वः पानीयं यस्य। क्षारतया पक्षिणोऽपि जलं न पिबन्ती-
त्यर्थः। क्षारो धनं तद्वर्जितम् उद्धतरत्नत्वात् परिमाणवार्तया
रहितम्। एतावता पारगमनासंभवान्न मनुष्याणां तयोपयोग
इत्युक्तं भवति। प्रकर्षेण वितता विस्तीर्णा बहुवेला बहुका-
लीना एतादृशी या प्रक्रिया महावराहखुरक्षोभमथनादिरूपा
तत्समूहेन दुःस्थं दुःखितम्। एतावता पराभिभाव्यत्वमुक्तम्।
इति समुद्रस्यासत्यपक्षे। अतिशयिता महान्तः पक्षिणो
गरुडादयो यत्र तादृशाः पानीयं यस्य, एतावता चटकादि-

भिन्नभिन्नत्वेऽपि गरुडादिभिः परिगृहीतत्वान्न क्षतिरिति भावः। न विद्यते सारो यस्मादन्यत्र किंयद्धनमुद्धृतं बाहुल्येन तु तिष्ठतीति भावः। जलाशयस्य परिमाणराहित्यं तु प्रकर्ष एव। प्रक्रिया सांयात्रिकाणां गतागतादि, तया दुःस्थं तावता परोपकारित्वमुक्तमिति तस्य सामीचीन्ये। अतिशयेन विगता रसाः शृङ्गारादयो यत्र तेषामनिरूपणात्। सारेण प्रयोजनेन शून्यम्। मोक्षस्य तुल्यायव्ययत्वेनापुरुषार्थत्वात्। प्रमाणवार्तया विहीनं प्रत्यक्षानुमानयोरेव निरूपणेन शब्दादीनामनिरूपणात्। प्रकर्षेण विततबहुवेलप्रक्रियाजालेन पाकजद्वित्वाद्युत्पत्तिविनाशरूपेण दुःस्था यस्मात्। एतदध्येतॄणां प्रक्रियाज्ञान एव जन्मक्षेपो भवति क्व मोक्षसंभव इति भावः। इति शास्त्रासम्यक्त्वे। सम्यक्त्वे तु रसविगममतिक्रान्तं मधुरादिरसव्युत्पादनात् न विद्यते सारो यस्मात् अन्यत्र मोक्षपुरुषार्थत्वस्य व्यवस्थाप्यत्वात्तस्य च स्वर्गादिभ्यः प्रकृष्टत्वात्। मानवार्तयाऽविहीनं शब्दादेरुक्तयोरेवान्तर्भावात्। प्रक्रियायाः सम्यग्व्युत्पादनेन प्रगता प्रक्रियाजालेन यान्यत्र दुःस्था सा यस्मात्॥ ४॥

ननु निष्फले मङ्गले कथं प्रवृत्तिरत आह—शास्त्रेति।
3.5 शास्त्रारम्भपूर्वसमये, आरम्भ आद्या कृतिस्तत्समये आरम्भ-
8.1 स्यैव करणात्। शिष्टाचारतया मङ्गलं सफलम्। बहुमङ्गलाचरणं बहुविघ्नशङ्कया निबन्धः शिष्यशिक्षार्थमिति भावः। ननु प्रणमामीत्यनेनापि निबन्धस्य संभवात् किमर्थं कृत्वानिर्देश इत्यत आह—कर्तव्येति। तथाच शिष्यशिक्षायै तस्य पूर्वकालतापि बोधनीयेति कृत्वानिर्देश इति भावः। निब-

न्धश्च तद्बोधिका लिपिः। अव्यवहितपूर्वकालत्वं क्त्वो वाच्यमिति प्राच्यनैयायिकाः। पूर्वकालत्वमेवेति तदपेक्षया नव्याः। आनन्तर्यमिति चिन्तामणिकृतः। समानकर्तृकत्वमिति मीमांसकाः। समानकर्तृकत्वे सति पूर्वकालत्वमिति वैयाकरणाः। ननु नत्वेत्येवास्तु 'प्र'शब्दो व्यर्थ इत्यत आह–भक्तीति। आराध्यत्वेन ज्ञानं भक्तिः। वैदिकार्थनिश्चयः श्रद्धा(१)। तयोर्योऽतिशयस्तल्लक्षणः प्रकर्ष इत्यर्थः। प्रकृष्टं मङ्गलं कर्तव्यमिति शिष्यशिक्षार्थं 'प्र'शब्दोपादानमित्याशयार्थः। द्योतकत्वं तूपसर्गस्य शक्त्यवच्छेदकत्वं केवलस्य धातोः स्वार्थे शक्तस्य प्राद्युत्तरस्य प्रकृष्टजयादौ शक्तेः। यद्वा, प्राद्युत्तरस्य धातोः प्रकृष्टजयादौ लक्षणा। तात्पर्यग्राहकत्वमुपसर्गाणामिति नैयायिकाः। प्रादीनामुपसर्गाणां प्रकर्षादौ शक्तिरेवेति मीमांसकाः। ननु प्रकृष्टाया नतेर्निबन्धः किमर्थमित्यत आह–तथेति। केवलाया निबन्धे मङ्गलनिबन्ध एव न स्यादिति भावः। ननु किं मङ्गलस्य फलमत आह–कृतेति। चिरां कालान्तर भाविनि फले द्वारतया विघ्नध्वंस उक्तः। प्रचयो गुरुणा शिष्याय दानस्याविच्छेदः प्रचारलक्षण इति भावः। ननु मङ्गलं विनापि नास्तिकाद्यनुष्ठितसमाप्तेः कथं कारणत्वमत आह–आगमेति। श्रुतिसिद्धे कार्यकारणभावे यत्रैहिकं मङ्गलं न दृश्यते तत्र जन्मान्तरीयं कल्पनीयम्। एवं च दोषाय यो व्यभिचारः कारणं विना कार्यमित्येवंरूपः स इह नास्तीत्यर्थः। एतेन व्यभिचारः कथं न दोषायेति परास्तम्। ननु मङ्गलस्य समाप्तिकारणत्वे मङ्गले सति समाप्त्यभावलक्षणोऽन्वयव्यभिचारो न स्यात् वैदिककर्मणः फलावश्यभाव-

(१) B reads वैदिककर्मणः फलावश्यम्भावनिश्चयः श्रद्धा।

नियमादत आह-तस्येति । तस्य अन्वयव्यभिचारस्य । कर्म मङ्गलम् । तस्य वैगुण्यं भक्त्यादिराहित्यम् । कर्तुर्वैगुण्यमप्रायत्यम् । साधनस्य दधिदूर्वादेरशुचित्वं मतम् । तथा च कर्माद्यन्यतमवैगुण्ये मङ्गले सति फलाभावो भवति, तत्र च मङ्गलं निरङ्गमेव, साङ्गाच्च वैदिककर्मणः फलावश्यम्भाव इति भावः । ननु यत्र साङ्गादपि न फलं तत्र का गतिरत आह—साद्गुण्येऽपीति । विघ्नहेतूनां विघ्नरूपाणां प्रतिबन्धहेतूनाम् । अयमाशयः—एकेन मङ्गलेनैकस्यैव विघ्नस्य नाशाद्यत्र विघ्ना मङ्गलापेक्षयाधिकसंख्यास्तत्र सर्वविघ्नानामनाशान्न समाप्तिरिति । नन्वेवं साङ्गस्यापि वैदिकस्य मङ्गलस्य निष्फलत्वमेव जातम् । न च तत्र विघ्नध्वंसेनैव फलवत्ता तस्य व्यापारतया फलत्वाभावादत आह—न चेति । अनेन विघ्नन्यूनसंख्यमङ्गलेन । प्राचितस्येति । विघ्नसमसंख्यत्वं च प्रचयः, न त्वनेकत्वमात्रं तावतापि विघ्नन्यूनसंख्यत्वसंभवात् । अयमाशयः—तदानीं मङ्गलस्य न्यूनतया सकलविघ्ननाशाभावेऽपि यदान्यानि मङ्गलानि भविष्यन्ति तदा तेषामपि नाशः । एवञ्च सकलविघ्ननाशे ऐहिकी पारलौकिकी वा समाप्तिर्मङ्गलाद्भवत्येव । एतन्मते जन्मान्तरीयमङ्गलस्यापि जन्मान्तरीयसमाप्तिहेतुत्वादिति न निष्फलतेति । ननु प्रचितमङ्गलकरणमेकदा न संभवत्येव । एकं च मङ्गलमसमर्थमेवेति मङ्गले प्रवृत्तिर्न स्यादत आह—न हीति । यदि क्रमशः क्रियमाणे यत्र कार्योपयोगिता तन्नोपादीयत एव तदा तृणसंग्रहो न क्रियेत कार्योपयुक्तानां युगपदुपादातुमशक्यत्वादिति भावः । नहीत्यादिना द्वौ नञाविति न्यायात् क्रमशः क्रियमाणेऽपि प्रचिते कार्योपयुक्ते उपादानं समर्थितं तत्र हेतुमाह--सजातीयेति । ननु प्रायश्चित्तवद् दु-

रितध्वंसार्थिप्रवृत्तितया दुरितसंशयप्रतिबन्धत्वं स्यादत
आह—न चेति। मङ्गलप्रवृत्तौ शिष्टाचारो मूलं, स च संदे-
हेऽपि दृष्टः, प्रायश्चित्तप्रवृत्तिं तु वेदो निश्चय एवाहेति
भावः। अन्यथा क्वचिदनिष्टनिश्चयस्यानिष्टध्वंसार्थिप्रवृत्तौ
हेतुत्वे सर्वत्र तथा(१)त्वोपगमेऽतिप्रसङ्ग इत्याह—अन्य-
थेति।

ननीश्वरमित्यस्य जगत्कर्तारमित्यर्थकतया व्याप्यस्य
जगत्कर्तृत्वस्य प्राप्तौ व्यापकस्य जगद्धेतुत्वस्य प्राप्तिर्भवि-
ष्यत्येव। तथा चाग्निरित्यभिधाने धूमवत्त्वस्येवेश्वरमि-
त्यभिधाने हेतुमित्यस्य वैयर्थ्यमत आह—ईश्वरमिति। 4.8
प्रमाणेति। व्यर्थं सत्किञ्चिज्ज्ञापयतीति न्यायादिति भावः। 29.1
यत्प्रमाणं सूच्यते तदाह—कार्य हीति। क्षित्यादिकं
सकर्तृकं कार्यत्वाद् घटवदित्यनुमानमित्यर्थः। ईश्वरेति। के-
वलस्य हेतुपदस्य यद्यपि कारणमात्रे शक्तिस्तथापीश्वरपदसं-
निहितस्य मोक्षासाधारणकारण इति हेतुं मोक्षासाधारण-
कारणमित्यर्थः(२)। न चास्यापि जगत्कर्तृत्वं व्याप्यत्वेन नि-
श्चितं येन वैयर्थ्यमिति भावः। ननु भगवतो मोक्षासाधारण-
कारणत्वे प्रमाणाभाव इत्यत आह—प्रस्तुतेति। प्रकृत-
शास्त्रासाधारणकारणमित्यर्थः। तत्र प्रमाणमाह—स्मर्यते
हीति। तेनेति। हेतुपदस्य प्रकारत्रयेण सार्थकत्वेनेत्यर्थः।
तमीश्वरम्। क्रियायां कर्तुरपेक्षायामध्याहरति—मयेति।
नन्वीश्वरस्यावधित्वं न संभवतीत्यत आह—अत इति।
अत्र च प्रणम्येत्यस्यानुषङ्गो न त्वध्याहारः। तत्रासत्वेऽध्या-

(१) B reads तथोक्तोपगमे। (२) B reads here
संनिहितस्य मोक्षासाधारणहेतुं मोक्षासाधारणकारणमित्यर्थः।

द्वारस्तत्रस्थस्यैवान्यत्रापि योजनेऽनुषङ्ग इति तयोर्भेदादित्याह—अनुषज्यत इति । ननु शिष्टाचारादेव क्रमप्राप्तेस्तद्बोधनायान्वितीति व्यर्थमित्यत आह—यद्यपीति । उपायस्योपायान्तराविरोधित्वादित्यर्थः । अन्यथा मङ्गलनिबन्धोऽपि व्यर्थ इति भावः । यद्यन्वितयनेन पश्चाद्भावः शब्दोपात्तस्तदा तदवधिः पूर्ववर्त्यपि शब्दोपात्त एवापेक्षितः शाब्दी आकाङ्क्षा शब्देनैव पूर्यत इति न्यायात् । ननु पूर्वमीश्वरप्रणामस्य कृतत्वात्संनिधानादेव तस्यावधित्वं प्राप्तव्यं प्रकरणाद्युपस्थितस्य शब्दानुपस्थितस्य शाब्दबोधाविषयत्वादित्याह—तथा चेति । तथाच पश्चाद्भावस्य शाब्दत्वादित्यर्थः । एवञ्च तस्य शाब्दतयाऽवधेरशाब्दत्वं नाशङ्कनीयमिति भावः । श्रुतीति । यत्रैकोऽर्थः श्रुतिप्राप्तस्तत्र तदपेक्षितोऽपरोऽपि श्रुतिप्राप्त एवापेक्षितो न तु प्रकरणाद्युप-
5.1 स्थापित इत्यर्थः । श्रुतिः शब्दः । अथवेति । अथ चेत्यर्थः । विकल्पे श्रुतीत्यादिदोषानुद्धारात् । शुश्रूषा सेवा । श्रेयो मोक्षः । गुणेषु दोषारोपोऽसूया । अन्तेवासिनः शिष्याः । अन्यथा एतादृशशिष्याभावे । एतत्कथनस्य प्रयोजनम् । इत्यपीति । तथा चेति । शिष्यपरम्परासामीचीन्य इत्यर्थः । एतादृशशिष्यपरम्परायां शास्त्रस्य वीर्यवत्तायां व्यतिरेकमुखेन श्रुतिरेव मूलमित्याह—येनेति । सूत्रभाष्ययोरेकार्थत्वादपि तथा व्याख्येयमित्याशयेनाह—एतेनेति । "अथातो धर्मं व्याख्यास्यामः" (वै० सू० १ १ १) इत्यत्र कणादसूत्रेऽथ शिष्याकाङ्क्षानन्तरं यत ईदृशाः शिष्या उपसेदुरित्येवार्थोऽर्थान्तरस्यासंभवादिति भावः ।

ननु पदार्थेत्यादौ न पदार्थश्चासौ धर्मश्चेति कर्म-

धारयः पदार्थत्वस्य धर्मत्वपरिहारेणावृत्तौ सत्त्वेऽपि धर्मत्वस्य पदार्थत्वपरिहाराभावात् वस्तुमात्रस्य पदार्थत्वात् परस्परव्यभिचारिणोरेकत्र वृत्तावेव कर्मधारयस्यौत्सर्गिकत्वात् नीलोत्पलमित्यादौ तथा दर्शनात्। नापि द्वन्द्वः कस्य धर्म इत्याकाङ्क्षाया अपरिपूर्तेः। नापि पदार्थो धर्मो यस्येति बहुव्रीहिः, एवं हि पदार्थस्यैवान्यपदार्थतया पदार्थसंग्रह इत्येतावतैव चरितार्थत्वात् तत्पुरुषापेक्षया बहुव्रीहेर्गुरुत्वाच्चेत्यत आह
–पदार्था इति। साधर्म्यमनुगमकं, वैधर्म्यं व्यावर्तकम्। 5.8-9 33,1
तच्च क्वचित्संकीर्णं यथा द्रव्यत्वादि, तद्धि गुणाद्यपेक्षया व्यावर्तकं परस्परमनुगमकं च। एतद् घटत्वादि तु वैधर्म्यमेव। प्रमेयत्वादि साधर्म्यमेवेति भावः। ननु यदि धर्मा द्रव्याद्यतिरिक्तास्तदाऽष्टमपदार्थापत्तिरत आह–त एवेति। नन्वभेदे कथं धर्मधर्मिभाव इत्यत आह–परस्परमिति। न हि स एव पदार्थस्तस्य धर्मः, किन्तु पदार्थेषु कस्यचित्कश्चिद्धर्मो, यथा द्रव्यस्य गुण इत्यर्थः।

ननु सङ्ग्रहस्य कथनात्मकस्य कथनमनुपपन्नमत आह–शास्त्र इति। संग्रहपदेन कर्मव्युत्पत्त्या धर्म एवोच्यते, तस्य च कथनं संभवत्येवेति भावः। एवञ्च पदार्थधर्माणां संग्रह इति भ्रमो न कार्यः। किन्तु धर्म एव संग्रहः। न च कर्मव्युत्पत्तिपरत्वे कथ्यन्त इति संग्रह इत्येकवचनानुपपत्तिः। कर्मव्युत्पत्तिरत्र कार्येत्येतावन्मात्रसूचकतया संगृह्यत इति संग्रह इति ग्रन्थमर्यादायाः पर्यवसानात्। नन्वेवं महोदय इत्यनेनोक्तं शास्त्रस्य तत्त्वज्ञानजनकत्वं विरुध्येतेति चेन्न। तत्रापि धर्मस्यैवोक्तेरेतन्मते लिङ्गस्यैव करणत्वात्। अभिधेयस्य च सफलत्वेऽभिधायकस्यापि सफलत्वसिद्धेः। संक-

लय्य सम्यक्प्रकारेण ज्ञात्वा । अज्ञातृकृतस्य संग्रहस्य तथार्थप्रकाशकत्वाभावात् । यद्वा, संकलय्य उचितसंनिवेशेन । अत एवाह—प्रकरणशुद्धेरिति । उचितसंनिवेशेन कथनरूपा प्रकरणशुद्धिः । उचितसंनिवेशेन कथनं त्वेकं पदार्थमुद्देशादिक्रमेण समाप्यापरस्यारम्भः । अनुचितस्तु संनिवेशो द्रव्यलक्षणं द्रव्यत्वं, तच्च जातिः, जातिलक्षणं नित्यत्वे सत्यनेकवृत्तित्वमित्यादि ।

नन्वस्य शास्त्रैकदेशबद्धत्वाभावात्कथं प्रकरणत्वमिति चेन्न । ग्रन्थमात्रस्य प्रकरणपदेनाभिधानात् । ग्रन्थान्तरेणान्यथासिद्धिमपाकरोति—सूत्र इति । भाष्यस्य रावणप्रणीतस्य । ननु प्रवक्ष्यत इत्येव कथं न कृतमित्यत आह—एतेनेति । पदार्थेत्यादि विनाभिधेयप्रतीतिर्न स्यादित्यर्थः । महानिति । उद्बोधे महत्त्वं तत्त्वविषयकत्वं गुणे गुणानङ्गीकारात् ।

तत इति । उद्बोधजनकत्वेऽपि कथमत्र प्रवृत्तिरुद्बोधस्य
5.18 सुखदुःखाभावेतरत्वादित्यर्थः । इत्यत्रेति । मोक्षजनकतया
35.4 तत्त्वज्ञानं गौणः पुरुषार्थः, तज्जनकतयाऽत्र प्रवृत्तिरित्यर्थः ।
ननु तस्य भावस्तत्त्वं, तथा च पदार्थानां तस्य भाव इत्यनन्वितं पदार्थानां भावो धर्म इत्येतावतैवोपपत्तेश्चेत्यत आह—तत्त्वमिति । नायं शब्दो यौगिकोऽपि त्वनारोपिते रूढ इति भावः । ननु यो धर्मो यत्रानारोपितः विद्यमान इति यावत् स तस्य तत्त्वमिति पर्यवसन्नम् । न च तस्य ज्ञानं तत्त्वज्ञानमपि त्वितरभेदज्ञानमिति चेन्न । धर्ममात्रवाचिना तत्त्वपदेनात्रेतरभिन्नत्वलक्षणधर्मस्य ग्रहणात् । अत्यन्तासंकीर्णा इति । साक्षात्कारविषयीभूतभेदा इत्यर्थः । प्रत्यक्षे-

ऽपि भेदे वैधर्म्यज्ञानापेक्षाऽतीन्द्रिये तु सुतरामित्याशयः ।
मिश्रीभूतत्वं साक्षात्काराविषयीभूतभेदत्वे । अतीन्द्रियत्वं
च कालाकाशादय इत्यस्यैव विशेषणं मिश्रीभूतत्वं शरीरा-
देरपि । एतेनेति । यद्यपि पदार्थधर्मेत्यत्र तत्पुरुषे उत्तरप-
दार्थस्य प्रधानतया धर्मतत्त्वज्ञानस्य मोक्षजनकत्वं प्राप्तं
तथापि द्रव्येत्यादिभाष्येण द्रव्यादिज्ञानस्यैव मोक्षजनकत्वं
ज्ञातव्यं, श्रुतावप्यात्मन एव श्रवणादि विहितं न त्वात्मतत्त्व-
स्येत्यर्थः । यद्यपि तत्त्वज्ञानमात्मन एव मोक्षोपयोगि तन्मि-
थ्याज्ञानस्यैव संसारहेतुत्वात्तथापीतरभेदज्ञानस्य तत्त्वज्ञा-
नतयेतरत्वेन पृथिव्यादयोऽपि ज्ञेया इति भावः ।

अभावो भाष्यकृता नोपवर्णितस्तुच्छत्वादिति केचित् ।
तन्मतनिरासायाह—अभावास्त्विति । स्वरूपवान् प्रामा- 68
णिकः । पृथक् द्रव्यादिवत्तत्त्वज्ञानविषयतया । न त्वत्र भाष्ये 38.1
नोक्त एव फलस्य निःश्रेयसस्याभावरूपत्वादित्याशयः। तथाऽ-
नभिधाने हेतुमाह—प्रतियोगीति । प्रतियोगिनिरूपणं
शास्त्रान्तरं, तच्च प्रकृते न्यायदर्शनं, तदधीननिरूपणत्वादि-
त्यर्थः । नन्वेतावताऽभ्युपगमसिद्धान्तसिद्धत्वमभावे उक्तं,
तच्च तदा स्याद्यदि स्वतन्त्रेऽभावोऽधिकृतः स्यादिति स्व-
तन्त्रेऽधिकृतत्वमाह—उत्पत्तीति । प्रागभाववत एवोत्पत्तिरि-
ति तच्चिन्तायां प्रागभावोऽधिकृतः, विनाशचिन्तायां तु ध्वंसः
प्राधान्येनैवाधिकृतः । वैधर्म्यकथनेऽन्योन्याभावात्यन्ता-
भावावधिकृतौ, वैधर्म्यस्य व्यतिरेकिहेतुतया तत्साध्यतयाऽ-
न्योन्याभावस्य व्यतिरेकव्याप्तौ साध्यहेत्वोरत्यन्ताभावस्य
स्वीकृतत्वादिति भावः । अभ्युपगमसिद्धान्तसिद्धस्य च प्रा-
धान्येनानभिधानं न्यायदर्शने मनस इन्द्रियत्वस्य दृष्टमिति
हृदयम् ।

नन्विष्टसाधनताज्ञानं प्रवर्तकं तच्च न शास्त्रे तस्य
6.12 39.3 मोक्षे प्रयोजकत्वेऽपि हेतुत्वाभावादत आह—तेनेति ।
लाघवेन प्रयोजकताज्ञानमेव प्रवर्तकमिति भावः । अविज्ञा-
तनिःश्रेयसार्थं प्रवृत्त्यनुपपत्तेराह—निःश्रेयसमिति । निवृ-
त्तिमात्रं घटादिनिवृत्तिसाधारणं दुःखनिवृत्तिश्च संसारिता-
दशायामपीति आत्यन्तिकीति । यदनन्तरं तदात्मनि दुःखं
नोत्पद्यते सा दुःखनिवृत्तिर्मोक्ष इत्याशयः । अत्रेति । मोक्ष-
दशायां दुःखनिवृत्तिसत्त्व इत्यर्थः । तथा चान्यैरप्यस्यैव
मोक्षत्वं मन्तुमुचितमिति भावः । न त्वेतस्य मोक्षत्वे विवा-
दाभाव इत्यर्थः । मतान्तरोपन्यासानुपपत्तेः । कण्टकादयो
दुःखहेतुतया निवर्त्यन्ते, दुःखकारणं चात्मापि, तथा च
सोऽपि निवर्तयितव्य इति तन्निवृत्तिरेव मोक्ष इति बौद्ध-
मतमाह—केवलमिति । आत्मापि आत्मैव, प्रधानहेतुत्वात्
केवलमात्मन एव निवृत्तौ यत्न उचितस्तन्निवृत्तावन्येषां सता-
मपि दुःखाहेतुत्वादित्याशयः । यदि मोक्षदशायां शरीरा-
देरात्मतयाभिमतस्य निवृत्तिरुच्यते तदेष्टापत्तिः । अथ शरी-
रादेरतिरिक्तस्य तदा तस्याप्रामाणिकस्य निवृत्तिरनुचितेति
प्रमाणं वाच्यम् । शरीरादिभिन्ने च प्रमाणं शरीरादेरात्मतायां
स्तन्यपाने रागानुपपत्तिः तस्येष्टसाधनताज्ञानसाध्यत्वात्
ज्ञानस्यानुभावकासंभवेन स्मरणरूपस्यानुभवसाध्यतया पू-
र्वजन्मन्यप्यनुभवाश्रयतया शरीरादिभिन्न एवात्मायाती-
त्येवंरूपम् । एवं च नित्य एवायाति तज्जन्मन्यपि रागा-
श्रयतया तत्पूर्वजन्मन्यप्यनुभवाश्रयतया सिद्धावनादित्व-
सिद्धावनादिभावस्य नित्यत्वादित्याह—तेषामिति । ननु
शरीरादिभिन्नस्य चात्मनो निवृत्तिरत आह । अथेति ।

दग्धेति । यथाऽनल इन्धनं विनाश्य नश्यति तथा मि-
थ्याज्ञानं विनाश्य मोक्षे मोक्षकाले तत्त्वज्ञानं नश्यतीत्य-
र्थः । न तु प्रथमान्तः पाठः, ज्ञानहानेरपुरुषार्थत्वात् ।

प्रकृतीति । बुद्धितत्त्वाश्रयमित्यर्थः । तथैव तेषां सि- 7.1
द्धान्तात् । घटोऽयमित्याद्याकारं ज्ञानं प्रवृत्तिविज्ञानं, तत्का- 46.5-6
रणमहमिति विज्ञानमालयविज्ञानं, तदेवानुपप्लवं धार-
याऽनन्तं मोक्ष इति केषाञ्चिद्बौद्धानां मतमाह—येऽपीति ।
एतेषामपि मोक्षदशायां दुःखनिवृत्तिरस्तीत्याह—तेऽपीति ।
तन्निवृत्तिं दुःखनिवृत्तिम् । अहमहमित्याकारको धारयाऽनन्तो
ज्ञानप्रवाहो मुक्तिरित्यंशस्त्वनुपपन्न एव मोक्षदशायां कार-
णस्य शरीरस्यापाये कार्यस्य ज्ञानस्योत्पत्तुमनर्हत्वादि-
त्याह—न चेति । ननु सोपप्लवज्ञानत्वेन शरीरत्वेन कार्य-
कारणभावो न तु ज्ञानत्वेन, तथा चानुपप्लवं ज्ञानं मोक्ष-
स्वरूपं शरीरं विनापि स्यादिति शङ्कते—उपप्लवेति ।
एतावता मोक्षस्वरूपं ज्ञानं शरीराजन्यमित्युक्तं, तन्नोपप-
द्यते मोक्षस्य शरीरसाध्यत्वादित्याह—अनुपप्लवस्येति ।
मोक्षस्येत्यर्थः । तदेव दृढीकरोति—न हीति । ननु शरीरस्य
मोक्षजनकत्वे न प्रमाणमत आह—तस्येति । मोक्षस्येत्यर्थः ।
एवं च योगाभ्यासस्य मोक्षजनकतायाः श्रुतिसिद्धत्वात्तस्य
च शरीरं विनानुपपत्तेः शरीरमपि मोक्षकारणमिति ज्ञानस्य
मोक्षत्वे कथं शरीरासाध्यत्वमिति तत्साध्यतायां कथं कारणं
विना कार्यमिति न ज्ञानप्रवाहोऽनुपप्लवो मोक्षोऽपि त्वनुपप्लव-
मात्रमिति भावः । ननु मोक्षः शरीरनाशको न तु शरीरजन्य
इत्यत आह—अन्यथेति । यद्यनुपप्लवा चित्तसंततिर्मोक्षः,
स च शरीरनाशक इत्यर्थः । शरीरस्याप्युपप्लवतया तत्सत्त्वे

नानुपप्लवा चित्तसंततिरिति शरीरनाशेऽनुपप्लवा चित्तसंततिः, जातायां च तस्यां नाशिकायां शरीरनिवृत्तिरित्यन्योन्याश्रय इत्याह—शरीरादीति। शरीरस्यावास्तवतया न मोक्षकारणत्वमिति शङ्कते—अथेति।

7.11-12 48. 4 वेदान्तिनामिति। आत्मैव केवलं दुःखरहितो वर्तत इत्यत्र विवादाभाव इत्यर्थः। अविद्यातन्निवृत्त्योर्विवादसत्त्वात्। न च केवल इति पुंलिङ्गापत्तिः केवलं कैवल्यं दुःखादिराहित्यं यथा स्यात्तथा वर्तत इति क्रियाविशेषणत्वात्। न पुत्र इति। पुत्रो न पुत्रतया प्रियः शत्रुपुत्रस्यापि तथात्वापत्तेः, अपि त्वात्मपुत्रतया। एवं चात्मसंबन्धेनान्यस्य प्रियत्वम् आत्मा स्वभावतः प्रियः सुखस्वरूपः, स्वसंबन्धेन स्फटिके लौहित्यसमर्पकजवाकुसुममिव लोहितमित्यर्थः। नित्यस्य सुखस्याभिव्यक्तिर्मुक्तिरिति मीमांसकमतमपाकरोति—तौतातिता इति। साऽभिव्यक्तिर्नित्या मोक्षस्यापुरुषार्थत्वापातात्, तथा च जन्या वाच्या। तत्र च भवतां त्रितयत्यागः—अस्माभिरीश्वरसाधनेऽशरीरी कथं ज्ञानी भविष्यतीति त्वया कथनेन शरीरं विना न ज्ञानमिति स्वीकारात्, इदानीं च मोक्षदशायां शरीरं विना ज्ञानस्वीकारेण स्वीकृतत्यागे त्रपा, विनाकारणं शरीरं विना कार्यस्य ज्ञानस्य स्वीकारे विरोधः, शरीरं विना ज्ञानस्वीकारे निरुक्तस्य बाधकस्याभावेनेश्वरसिद्धिः स्यादिति भयमित्यर्थः। एतेनेति। न हीत्यादिनेत्यर्थः। स्वरूपतः दुःखाहेतुतयाऽदुःखतया चेत्यर्थः। अनयोर्हेयतायामप्रयोजकत्वेऽतिप्रसङ्ग इति भावः। ओमिति। साऽस्मन्मतेऽपि मुक्तिरित्यर्थः। साधनपरतन्त्रामिति।

एवं च यावत्साधनं तावत्स्थास्यति तदपगमे न स्थास्यतीति मुक्तस्यापि संसारितापत्तिरित्यर्थः । अस्मदभिमता मुक्तिस्तु कार्यत्वेऽपि न नश्यत्यभावत्वादिति भावः ।

तुल्यायव्ययतया न पुरुषार्थत्वमिति शङ्कते-अपुरुषार्थ 8.12
इति । सुखनाशस्तदा व्ययत्वेन गण्येत यदि सुखं दुःखसंबन्धेन 51.5
हेयं न स्यादित्याह—बहुतरेति । सुखस्य हेयत्वे दृष्टान्तमाह—मध्विति । पुरुषप्रयत्नासाध्यत्वेनापुरुषार्थत्वमाह—तथापीति । नाऽनागतस्य दुःखस्य निवृत्तिर्यत्नसाध्या प्रतियोगिन एवाभावात् । न वर्तमानस्य तस्य स्वानुभवेनैव नाशात् इदानीं तन्नाशे प्रयत्नापेक्षाया(१)अदर्शनात् । नाप्यतीतस्य प्रतियोगिन एवाभावादित्यर्थः । हेत्विति । यद्यपि मिथ्याज्ञानं दुःखवद् द्विक्षणावस्थायीति भवति तत्राप्यनागतादिविकल्पस्तथापि वासनायां स्थिरायां न संभवतीति पुरुषः प्रयत्नेन तत्त्वज्ञानमुत्पाद्य वासनायां नष्टायां रागाद्यपायक्रमेण दुःखाभावलक्षणं मोक्षमासादयति कारणाभावे कार्याभावस्य न्यायप्राप्तत्वादिति भावः । दुःखसन्ततिरिति । दुःखत्वं स्वाश्रयप्रागभावासमानकालीनध्वंसप्रतियोगिवृत्ति भावकार्यवृत्तिधर्मत्वात् एतत्प्रदीपत्ववत् इत्यत्र तात्पर्यम् । ध्वंसप्रतियोगिवृत्तीत्युक्तौ सिद्धसाधनं मीमांसकैरपि दुःखध्वंसस्वीकारात् अग्रे दुःखधारायाः परं तैः स्वीकारात् । प्रागभावासमानकालीनत्वे(२)दृष्टान्तासिद्धिः एतत्प्रदीपनाशस्य घटादिप्रागभावसमानकालीनत्वात्, न तु स एतत्प्रदीपप्रागभावसमानकालीन इति भवति(३) दृष्टान्तसंगतिः । धर्मत्वादित्युक्तावात्मत्वे व्यभिचारः कार्यवृत्तित्वादित्युक्ते(४)ध्वंसत्वे इति भवति दुःखत्वस्याश्रयो

(१) B reads यत्नापेक्षायाः । (२) B reads कालीनेत्युक्तौ ।
(३) B omits भवति । (४) B erads कार्यवृत्तिधर्मत्वादित्युक्ते ।

दुःखं, तत्प्रागभावासमानकालीनो दुःखध्वंसश्चरम आयाति यदनन्तरं न दुःखोत्पत्तिः । एतावता सर्वमुक्तिसिद्धिः । दृष्टान्ते त्वेतत्प्रदीपत्वस्याश्रय एष प्रदीपः तत्प्रागभावासमानकालीन एतत्प्रदीपध्वंसोऽस्त्येव तस्य प्रागेवोत्पन्नत्वेनाग्रे तत्प्रागभावादिति(१) । नित्यानित्यगतं द्रव्यत्वादि तु पक्षसममेव चरमद्रव्यादिध्वंसस्य तत्प्रागभावासमानकालत्वादिति हृदयम् ।

एतेन दुःखसंततिर्दुःखधाराऽत्यन्तमुच्छिद्यते संतति-
त्वात् कर्मधारात्वात् प्रदीपधारावदित्यत्र कोऽयम-
त्यन्तोच्छेदः ? न तावत्स्वप्रागभावासमानकालीनध्वंसप्र-
तियोगीति साध्यार्थः सिद्धसाधनात् सर्वस्य दुःखस्य ध्वंसप्र-
तियोगित्वात् सर्वस्य च ध्वंसस्य स्वप्रतियोगिदुःख-
प्रागभावासमानकालीनत्वात् । न च स्वसजातीयप्रा-
गभावासमानकालीनत्वमर्थः । अद्योत्पन्नदुःखत्वादिना
साजात्यमादाय सिद्धसाधनात् । अद्योत्पन्नचरमदुःखध्वंस-
स्याद्योत्पन्नदुःखप्रागभावासमानकालीनत्वादित्यादिदूषण-
मपास्तम् । पार्थिवपरमाणुरूपे(२) व्यभिचारस्तत्रैक-
रूपध्वंसस्यापररूपप्रागभावसमानकालीनत्वात् रूपधा-
9.11 राया अविच्छेदादिति शङ्कते—पार्थिवेति । येन सर्व-
58.2 मुक्तिरिष्यते तेन तत्रापि धाराविच्छेदोऽङ्गीक्रियत एवेति
पक्षसमत्वान्न व्यभिचार इत्याह—सर्वात्मेति । यदि सर्व-
मुक्तिः स्यात्तदाऽदृष्टस्य बीजस्य प्रयोजनस्य भोगस्याभावा-
त्कार्याणामुत्पत्तिर्न स्यात्, सैव तु नास्तीति शङ्कते-
सर्वेति । तद्दुःखत्वे भावकार्यधर्मत्वं वर्तते साध्यं च नास्ति
धाराया अविच्छेदेन स्वाश्रयप्रागभावासमानकालीनध्वंसा-

---

(१) B reads तस्य प्रागभावोत्पन्नत्वेनाग्रे तत्प्रागभावाभावात् ।

(२) A reads रूपत्वे व्यभिचारः ।

भावादिति तत्रैव व्यभिचारः किं नोच्यत इत्याह—तर्हीति। इष्टापत्तिमाह--एवमिति। असिद्धेरिति। कश्चिदनपवृक्त एव तिष्ठतीत्यसिद्धेरित्यर्थः। यदि कश्चिदनपवृक्त एव तदा स्वस्य न त्वशङ्कया (?) कश्चिदपि मोक्षार्थं न प्रवर्ततेत्याह--सिद्धाविति। ननु यदि सर्वमुक्तिर्भाविनी स्यात्तर्ह्यद्यावधि स्यादेव। न चैकैकस्मिन् कल्पे एकैक एव मुक्तो भवतीति नेयता कालेन सर्वमुक्तिरिति वाच्यं, वृत्तकल्पानामनन्तत्वेन सर्वमुक्त्यापत्तेरिति शङ्कते--अथेति। अनन्तमुक्त्यापादने इष्टापत्तिरित्याह--सत्यमिति। सर्व- 10.8
मुक्त्यापादने परमस्माभिरिष्टापत्तिः कर्तुं न शक्यत इत्याह— 64.4
न त्विति। ननु तर्हि तदेवापाद्यमिति शङ्कते-नन्विति। सर्वमुक्तिर्यदि भाविनी स्यादद्यावध्युत्पद्येत अद्यावध्युत्पन्नघटवदित्याकारो हि तर्को वाच्यः, न चासौ संभवति यद्भावि तदियता कालेन भवतीति कालनियमे प्रमाणाभावादग्रे भाविनि व्यभिचारादेव व्याप्त्यभावात्तर्काभासतेत्याह-कालेति। ननु मुक्तिकारणादृष्टसत्त्वे कथं मुक्तिः अशेषविशेषगुणोच्छेदाभावात्, तदसत्त्वे कथं मुक्तिः कारणाभावादिति शङ्कते-न चेति। अपवर्गं प्रति मादृष्टं कारणमित्याह-अपवर्गस्येति। ननु दुःखनिवृत्तिरूपस्यापवर्गस्य श्रवणसाध्यनियमादृष्टसाध्यत्वात्कथमदृष्टाजन्यत्वम्, एवं च तददृष्टनाशार्थमप्यदृष्टस्वीकारे सैवामुक्तिरत आह—न हीति। तत्र प्रतियोगिरूपस्यादृष्टस्य जनकत्वेऽप्यन्यादृष्टापेक्षा नास्तीति भावः। एकस्येति। सर्वमुक्तिः परं त्वया नेष्यत इति भावः। दुःखसंततिर्नात्यन्तमुच्छिद्यते अनादित्वात् यन्नैवं तन्नैवं यथैतत्प्रदीपसंततिरिति प्रतिरोधं शङ्कते—आदिमतीति। यद्धर्माश्रयस्य प्रागभावः स्वाश्रयध्वंससमान-

कालीन एव तेन रूपेण तस्याश्रयस्यानादित्वमस्ति तद्दुःखे सर्वस्यापि दुःखप्रागभावस्य दुःखध्वंससमानकालीनत्वात् । न हि क्वापि दुःखोत्पत्तिः प्रथमतो येन तत्प्रागभावो दुःखध्वंसासमानकालीनः स्यात् । एतत्प्रदीपसंततौ प्रथमः प्रदीपस्तु प्राथमिक एव तत्प्रागभावदशायां तत्सन्तानान्तर्गतस्य कस्यापि ध्वंस इति भावः । यद्यादिमत्त्वमुच्छेदे प्रयोजकं स्यात्तर्हि आदिमत्सर्वं युगपदेवोच्छिद्येत, दृश्यते च कालभेदस्तत्र च मूलोच्छेदे कालभेदः प्रयोजकः, एवं च मूलोच्छेदस्य प्रयोजकस्य सत्त्वेऽत्यन्तोच्छेदः स्यादेव, तथा च प्रतिरोधानुमानमप्रयोजकमित्याह-मूलेति ।

11 3 स्थापनायां त्वागम एवानुकूलस्तर्क इत्याह-अशरीर
69.3 मिति । वा शब्द एवार्थे, तेनाशरीरमेव वसन्तमित्यर्थः । तेन मरणे पूर्वशरीरपरित्यागे यावच्छरीरान्तरं न गृह्णाति तावत्कालपरता भाष्य वचनस्येति भावः । श्रवणमननिदिध्यासनानां परोक्षमिथ्याज्ञाननिवर्तकतेति तत्त्वसाक्षात्कारस्य सा वाच्या, स कुतो जायत इत्याह-स्यादेतदिति । अपरोक्षमिति मिथ्याज्ञानमित्यस्य विशेषणम् । दिगिति । सूर्योदयेन प्राचीमनुमायापि मुह्यन्तीत्यर्थः । अत इति । यतोऽद्यापि भ्रमरूपमपरोक्षं चात एव बलवत्तरं तत्त्वज्ञानं, तथा च निवर्तनसमर्थमित्यन्वयः । मूलस्थस्यात इत्यस्यार्थस्तु परोक्षस्य मिथ्याज्ञानानिवर्तकत्वादिति ।

शास्त्रेणेति । अत्र निवृत्तिलक्षणो धर्मो निदिध्यासनजन्मा तस्यैव योगपदाभिधेयत्वात्, न तु निष्कामकर्मजन्मा ग्रन्थमर्यादया तथाऽप्राप्तेः योगविधिना योगजस्यैवोत्पत्तुमर्हत्वात् । यद्वा, योगविधिनोपलक्षितेन पुरुषेण सेविताद्-

स्यादित्यर्थः । नन्वेवमात्मनः सिद्धौ वृथाग्रिमं भाष्यमत
139.17 आह—संमतीति । रथेऽधिष्ठाता शरीरी दृष्टः प्रकृते
माधिष्ठेयातिरिक्तशरीरवानिति निरुक्तो यो विशेषाभावः
सोऽपि माऽस्त्वित्येतदर्थमग्रिमं भाष्यमित्यर्थः ।

नन्वात्मज्ञाने सत्यहमिति शब्दप्रयोगस्तेन चात्मज्ञानमित्यन्योन्याश्रय इत्यत आह—प्रत्ययमिति । तथा शब्दानन्वयं परिहरति—यथेति । अस्य प्रत्ययस्य प्रत्यक्षत्वे मानमाह—न हीति । उपमानस्य तु प्रसक्तिरेव नास्तीति भावः । पूर्वानुरोधेनात्रापि शब्दपदं प्रत्ययपरतया नयति—प्रत्ययेति । वैयधिकरण्यं दर्शयति—यदीति । ननु यथा कस्याञ्चित्पृथिव्यां घट इति व्यवहारो न पृथिवीमात्रे तथा शरीररूपायामहमिति नान्यत्रेति शङ्कते-स्यादेतति । य एवाहं बाल्ये स एवाहं वार्द्धक इति प्रतिसंधानादैक्यं प्रत्ययविषयः, न च तच्छरीरस्य संभवति तस्य परिमाणभेदेन भेदादित्याह—अहङ्कारस्येति । ननु तदेवेदं शरीरमिति प्रत्यभिज्ञानादेकमेव शरीरं सिध्यतीति भेदे प्रमाणाभावाच्छरीरस्य प्रतिसंधातृत्वसंभवेनाहमिति प्रत्ययस्य शरीरविषयत्वेन नात्मातिरिक्तः सिध्यति । न च प्रत्यभिज्ञानमप्रमाणं तद्बीजस्य विरुद्धसंसर्गस्य विरहादिति चेन्न । परिमाणभेदस्यैव विरुद्धधर्मसंसर्गत्वात् । ननु यथा द्वित्वादिभेदेऽपि न द्रव्यभेदस्तथा परिमाणभेदेऽपीति न विरुद्धधर्मसंसर्ग इति चेन्न । द्वित्वादेरुत्पादस्यापेक्षाबुद्धिप्रभृतेस्तन्नाशकस्य तन्नाशादेर्द्रव्यसत्त्वाविरोधितया तद्भेदेऽपि द्रव्यभेदस्याप्रामाणिकत्वात् । परिमाणनाशस्तु द्रव्यनाशादेवेति परिमाणभेदे द्रव्यभेदस्य प्रामा-

कृतया पुत्रेष्ट्या पुत्रेफलं पितृगताद्दृष्टद्वारैव, तथा च न धर्माध-
149.6 र्मयोः फलसामानाधिकरण्यनियम इत्यत आह—पुत्रेष्टीति । एवं च यत्र फलं तत्रादृष्टमिति नियमे न व्यभिचार इत्यर्थः । न च क्रिया कृतिसमानाधिकरणादृष्टजनिकेति नियमः, ऋत्विग्यदृष्टस्याजायमानत्वेन व्यभिचारादित्याह—अन्येति । अतोऽनुभवेति । व्यापारतया संस्कारस्यावश्यकत्वे वैयधिकरण्येऽतिप्रसङ्गेन सामानाधिकरण्यसिद्धिरित्यर्थः । इत्यत इति । इत्यतो जिज्ञासात इत्यर्थः । ननु नानात्वं दर्शितेऽपि जिज्ञासमानकोट्योर्न किमपि दर्शितमित्यत आह—तन्नान्तरीयकतयेति । तद्व्यापकतयेत्यर्थः ।

संसरतीति । अशेषविशेषगुणोच्छेदस्य मोक्षस्य संसारितायामसंभवेन तयोर्भेद इत्यर्थः । इयतेति । संसारिणामेव प्रत्यक्षसिद्धत्वादित्यर्थः । यन्नेति । यज्जातीयं न दृष्टं तज्जातीयं न भवतीत्यर्थः । नातो भाविघटे व्यभिचारः । बन्धादयस्तु नाविरुद्धा इत्याह—न चेति ।

ईश्वरः नारायणः । अग्रिमग्रन्थानुरोधात् । ईश्वरत्वस्य स्वधर्मेण विरोधमाह—नापीति ।

अवच्छेदकभेदेनैकस्यैव सुखादि न विरुद्धमिति शङ्कते—नन्विति । भिन्नशरीरावच्छेद्ययोः सुखदुःखयोरेकात्मगतत्वे कराद्यवच्छेद्ययोरिव प्रतिसंधानं स्यादित्याह—न ब्रूम इति । ननु शरीरलक्षणावच्छेदकाभेदेन प्रतिसंधानमिष्टमिति शङ्कते—अथेति । जन्मभेदेऽप्रतिसंधानं शरीरभेदेनोपपाद्यतां न तु जन्मैक्ये, तत्र संस्कारस्य नाशाद्यभावादित्याह—तत्रेति । न च नाशादि तत्र संभवति तच्छरीरावच्छेदेनाप्यस्मरणप्रसङ्गादित्याह न चेति । अविद्याया अपि प्रतिसंधानप्रतिबन्ध-

कूलतर्कपराहत इत्याशयः । ननु यस्य मूर्तत्वं तन्न प्राप्त-
मत आह – मनस इति । नन्वमूर्तत्ववादिनः क्रियावत्त्वे-
ऽपि विवाद इत्यत आह – क्रियावत्त्वेनेति । तच्च ज्ञाना- 156 15
यौगपद्यात्सिद्धमिति भावः ।

मनो ज्ञातृ करणत्वादित्यत्राप्रयोजककरणत्वकर्मत्वयो-
रिव कर्तृत्वकरणत्वयोरप्यविरोधात् । न ह्यनुमितिकरणं
धूमो न प्रत्यक्षकर्म । एकक्रियायां तु करणत्वकर्तृत्वे विरुद्धे
प्रयोज्यस्य करणत्वात् प्रयोजकस्य कर्तृत्वात् अभेदे तदभाव-
नियमात् इति प्रतिशरीरं ज्ञातृद्वयमस्तु कदाचित्किञ्चित्कर्तृ
कदाचित् किञ्चिदिति शङ्कते – करणत्वेनेति । साधारणय
इष्टापत्तावाह — तथाचेति । न हि ज्ञात्रोरभिप्रायैक्य-
नियमः । एवं चाभिप्रायभेदे किमपि न स्यात् । अभि-
प्रायैक्यं तु सर्वत्र न संभवत्येवेति भावः । न स्याताम् ।
नियमत इति शेषः । गुणत इति । गुणस्वरूपयोर्द्वयोरप्य-
तीन्द्रियत्वादिति भावः । अन्यथेति । कालादौ व्यभिचा-
रवारणाय मूर्तत्वसमानाधिकरणस्येति । मूर्तत्वे प्रमा-
णसत्त्वात्तत स्यात्स्यति न विशेषगुणवत्त्वं मूर्तत्वस्य तत्रा-
प्रयोजकत्वात । द्रव्यत्वे तु गुणवत्त्वमेव प्रयोजकमित्या-
ह—अवैभवादिति । वेगस्येति । आद्यक्रियायां किं
कारणमित्यर्थः । न हीति । तद्व्याप्यं न तु कारणमि-
त्यर्थः । ननु मिलितं व्यर्थमत आह—क्वचिदिति ।
संचारि चेति साध्यस्येतिशब्दस्तात्पर्यमाह–इतीति ।

